# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा** - आचार्य-१ ( **Sem_2** ) **प्रश्नपत्र-४** **गुणाः** - ७०

**विषयः** - धर्मशास्त्रम् CC 4.2.6 **समयः** - ११:०० तः ०२:००

**दिनाङ्कः** - 21/04/2016 **सन्दर्भग्रन्थः** - पारस्करगृह्यसूत्रम् - तृतीयकाण्डम्

---

**॥ प्रथमान्वितिः ॥**

**प्रश्न-१** **( क ) अधोलिखितकारिकाषु एकां कारिकां ससन्दर्भं विवेचयत ।** ०४

१. इमानुच्छ्रयामि भुवनस्य नाभिं वसोधोरां प्रतरणीं वसूनाम् ।
इहैव ध्रवान्निमिनोमी शालां क्षेमे तिष्ठतु घृतमुक्षमाणा ।

२. अग्निमिन्द्रं बृहस्पतिं विश्वान् देवानुह्वये ।
सरस्वतीं च वाणीं च वास्तु मे दत्त वाजिनः स्वाहा ॥

**( ख ) अधोलिखितेषु एकं प्रश्नं निबन्धात्मकं लिखत ।** ०६

१. ग्रन्थोक्तदिशा शालाकर्मवास्तुशांतिविषयं वर्णयत ।

२. ग्रन्थोक्तदिशा गोयज्ञपुरस्सरं वृषोत्सर्गं वर्णयत ।

**( ग ) षट्टिप्पणीषु टिप्पणीत्रयं साधयन्तु ।** ०६

१. शूलागवः । २. सभाप्रवेशविधिः । ३. गोष्ठाभिमन्त्रणम् ।
४. वृक्षाभिमन्त्रणम् । ५. अधीतस्याविस्मरणोपायाः ।

**( घ ) चतुर्णाम् एकेन वाक्येन उत्तरं यच्छत ।** ०४

१. नवान्नकस्मिन् काले भवति?

२. आग्रहापणीकर्मानुष्ठानं कदा करणीयम्?

३. कस्य अनुज्ञया होमः करणीयः?

४. गवालम्भेनम् – इत्यत्र कोऽर्थः?

५. सन्तानरहितस्य पिण्डदानं कः करोति?

६. गृहाग्निः कुत्रस्थापनीयः?

**॥ द्वितीयान्वितिः ॥**

**प्रश्न-२** **( क ) अधोलिखितकारिकाषु एकां कारिकां ससन्दर्भं विवेचयत ।** ०४

१. पूषा गा अन्वेतु नः पूषा रक्षत्वर्तत ।
पूषो वाज सनोतु न स्वाहा - इकति पौष्णस्य जुहोति ।

२. सं मा सिञ्चन्तु मरुतः समिन्द्रः सं बृहस्पतिः ।
सं मापमग्निः सिञ्चतु प्रजया च धनेन चेति ॥

**( ख ) अधोलिखितेषु एकं प्रश्नं निबन्धात्मकं लिखत ।** ०४

१. अन्त्येष्टिकर्म यथाग्रन्थं वर्णनीयम् । २. हस्ति-अश्व-उष्ट्रन्सररोहणं क्रमेण वर्णनीयम् ।

**( ग ) टिप्पणीद्वयं साधनीयम् ।** **०४**

१. नौकारोहणम् । २. वनाभिमन्त्रणम् । ३. मेघाभिमन्त्रणम् । ४. चतुष्पथगमनम् ।

**( घ ) एकेन वाक्येन उत्तरं यच्छत । ( त्रयमेव )** **०३**

१. उपाकर्म नाम किम्?

२. उपाकर्म कदा प्रारभेत्?

३. उपाकर्मानन्तरं कियत् दिनम् अनध्यायः?

४. अनध्यायः कदा कर्तव्यः?

५. गुरोः मृत्युसमये कति दिनानि अनध्यायः?

**॥ तृतीयान्वितिः ॥**

**प्रश्न-२** **( क ) अधोलिखितकारिकाषु एकां कारिकां ससन्दर्भं विवेचयत ।** **०४**

१. कर्कटे पुत्रलाभश्च सौख्यं मकरे भवेत् । मीने यशोर्थलाभश्च कुम्भे वसुबहूदकम् ।

२. उपनीय तु यः शिष्याँ वेदमध्यापयेद् द्विजः । साङ्गं च सरह्यञ्च तमाचायम्प्रचक्षते ॥

**( ख ) अधोलिखितेषु एकं प्रश्नं निबन्धात्मकं लिखत ।** **०४**

१. नित्यस्नानविधिं ग्रन्थोक्तदिशा वर्णयत । २. वापी-कूप-तडागादिविधिं वर्णयत ।

**( ग ) टिप्पमीद्वयं साधनीयम् ।** **०४**

१. शौचविधिः । २. आचमनविधिः । ३. कात्यायनोक्तं स्नानम् । ४. ब्रह्मयज्ञविधिः ।

**( घ ) एकेन वाक्येन उत्तरं यच्छत । ( त्रयमेव )** **०३**

१. शोचेन को लाभः? २. पितृतीर्थं कुत्राऽस्ति हस्ते?

३. पवित्रता संन्यासिनां कृते कीदृशी? ४. गोमयाभिमन्त्रणे कः मन्त्रः?

५. गोमूत्राभिमन्त्रणे कः मन्त्रः?

**॥ चतुर्थान्वितिः ॥**

**प्रश्न-२** **( क ) अधोलिखितकारिकाषु एकां कारिकां ससन्दर्भं विवेचयत ।** **०४**

१. उत्तरात्वयनाच्छ्राद्धे श्रेष्ठं स्यादक्षिणायनम् । चातुर्मास्यञ्च तेत्रापि प्रसुप्ते केशवेधिकम् ।

२. या तिथिर्यस्य मासस्य मृताहे तु प्रवर्तते । सा तिथिः प्रेतपक्षस्य पूजनीया प्रयत्नतः ॥

**( ख ) अधोलिखितेषुप्रश्नेषु प्रश्नमेकं निबन्धात्मकं लिखत ।** **०६**

१. आभ्युदयिकश्राद्धविधिं वर्णयत । २. सपण्डिश्राद्धविधिं वर्णयत ।

**( ग ) टिप्पणीषु टिप्पणीत्रयं साधयन्तु ।** **०६**

१. एकोदिष्टविधिः । २. अक्षय्यतृप्ति-उपायाः । ३. पाक्षिकश्राद्धविधिः । ४. द्रव्यविशेषः तृप्तिविशेषः ।

**( घ ) एकेन वाक्येन उत्तरं यच्छत । ( चत्वारि )** **०४**

१. योगीश्वरयाज्ञवल्क्यस्य अपरनामानि कानि ?

२. श्राद्धं कदा करणीयम् ?

३. श्राद्धशब्दस्य का व्याख्या ?

४. माङ्गलिकश्राद्धे कौ द्वौ देवौ स्तः ?

५. श्राद्धे निषिद्धब्राह्मणः के ?

६. पितृप्रसन्नतार्थं किं कर्तव्यं ?